# ५१. कार्यकर्तृगृहम्

सप्तमी बहुवचनम्

मालती - अद्य शीघ्रम् आगच्छतु । विजयनगरं गच्छावः ।

दिलीपः - विजयनगरे कः विशेषः ?

मालति - अद्य एव खलु सन्ध्यायाः विवाहः ? अतः शीघ्रं गच्छावः ।

दिलीपः - अद्य कार्यालये बहुकार्याणि सन्ति । केशवकृपायां मन्थनकार्यक्रमः । अतः विवाहगमनं न भवेत् ।

मालती - भवतः सर्वदा कार्यालये कार्याणि भवन्ति । रविवासरे अपि विरामः नास्ति । कुत्रापि गमनम् एव न भवति ।

दिलीपः - मालति ! खेदः मास्तु । कार्यालये १०वादने सीमायाः पाठः अस्ति । अथितिगृहे दीपव्यवस्था, सभाङ्गणे कार्यक्रमस्य व्यवस्था, कपाटिकायां पुस्तकानां योजनं, ग्रन्थालये आसन्दानां व्यस्थापनं, पत्रिकां नीता मुद्रणालये द दान तन्मध्ये राजाजिनगरे कार्यकर्तृगोष्ठी-निर्वहणम्-इत्यादीनि कार्याणि सन्ति । अत्र किं कार्यं परित्यजामि ।

मालती - अन्यं कार्यकर्तारः न सन्ति वा ?

दिलीपः - सुरेशः लखनऊ गतवान्, नारायणः कोलकतानगरं गतवान् । ते त्रयः शिविरं गच्छन्ति । पुनः के सन्ति ?

मालती - किमपि करोतु ।